श्री कालभैरवाष्टकम्

Shri Kalabhairava Ashtakam

Source: Wikimedia Commons — Brihat Stotra Ratnakara 1912 public-domain scan, stable file revision (item 57 on scan pages 135–136). Also compared: Internet Archive — Brihat Stotra Ratnakar, 1916 Nirnaya Sagar Press reprint (Kashmir Research Institute scan; item 57 on PDF pages 138–139); Public Domain Mark 1.0; Sanskrit Wikisource — Kalabhairava Ashtakam, 1910 edition transcription, fixed comparison revision 288253.

आठ स्तुति-श्लोक

SHLOKA 1

देवराजसेव्यमानपावनाङ्घ्रिपङ्कजं व्यालयज्ञसूत्रमिन्दुशेखरं कृपाकरम्।
नारदादियोगिवृन्दवन्दितं दिगम्बरं काशिकापुराधिनाथकालभैरवं भजे॥

Devarājasevyamānapāvanāṅghripaṅkajaṃ Vyālayajñasūtramindusekharaṃ Kṛpākaram |
Nāradādiyogivṛndavanditaṃ Digambaraṃ Kāśikāpurādhināthakālabhairavaṃ Bhaje ||

SHLOKA 2

भानुकोटिभास्वरं भवाब्धितारकं परं नीलकण्ठमीप्सितार्थदायकं त्रिलोचनम्।
कालकालमम्बुजाक्षमक्षशूलमक्षरं काशिकापुराधिनाथकालभैरवं भजे॥

Bhānukoṭibhāsvaraṃ Bhavābdhitārakaṃ Paraṃ Nīlakaṇṭhamīpsitārthadāyakaṃ Trilocanam |
Kālakālamambujākṣamakṣaśūlamakṣaraṃ Kāśikāpurādhināthakālabhairavaṃ Bhaje ||

SHLOKA 3

शूलटङ्कपाशदण्डपाणिमादिकारणं श्यामकायमादिदेवमक्षरं निरामयम्।
भीमविक्रमं प्रभुं विचित्रताण्डवप्रियं काशिकापुराधिनाथकालभैरवं भजे॥

Śūlaṭaṅkapāśadaṇḍapāṇimādikāraṇaṃ Śyāmakāyamādidevamakṣaraṃ Nirāmayam |
Bhīmavikramaṃ Prabhuṃ Vicitratāṇḍavapriyaṃ Kāśikāpurādhināthakālabhairavaṃ Bhaje ||

SHLOKA 4

भुक्तिमुक्तिदायकं प्रशस्तचारुविग्रहं भक्तवत्सलं स्थितं समस्तलोकविग्रहम्।
विनिक्वणन्मनोज्ञहेमकिङ्किणीलसत्कटिं काशिकापुराधिनाथकालभैरवं भजे॥

Bhuktimuktidāyakaṃ Praśastacāruvigrahaṃ Bhaktavatsalaṃ Sthitaṃ Samastalokavigraham |
Vinikvaṇanmanojñahemakiṅkiṇīlasatkaṭiṃ Kāśikāpurādhināthakālabhairavaṃ Bhaje ||

SHLOKA 5

धर्मसेतुपालकं त्वधर्ममार्गनाशकं कर्मपाशमोचकं सुशर्मदायकं विभुम्।
स्वर्णवर्णशेषपाशशोभिताङ्गमण्डलं काशिकापुराधिनाथकालभैरवं भजे॥

Dharmasetupālakaṃ Tvadharmamārganāśakaṃ Karmapāśamocakaṃ Suśarmadāyakaṃ Vibhum |
Svarṇavarṇaśeṣapāśaśobhitāṅgamaṇḍalaṃ Kāśikāpurādhināthakālabhairavaṃ Bhaje ||

SHLOKA 6

रत्नपादुकाप्रभाभिरामपादयुग्मकं नित्यमद्वितीयमिष्टदैवतं निरञ्जनम्।
मृत्युदर्पनाशनं करालदंष्ट्रमोक्षणं काशिकापुराधिनाथकालभैरवं भजे॥

Ratnapādukāprabhābhirāmapādayugmakaṃ Nityamadvitīyamiṣṭadaivataṃ Nirañjanam |
Mṛtyudarpanāśanaṃ Karāladaṃṣṭramokṣaṇaṃ Kāśikāpurādhināthakālabhairavaṃ Bhaje ||

SHLOKA 7

अट्टहासभिन्नपद्मजाण्डकोशसन्ततिं दृष्टिपातनष्टपापजालमुग्रशासनम्।
अष्टसिद्धिदायकं कपालमालिकन्धरं काशिकापुराधिनाथकालभैरवं भजे॥

Aṭṭahāsabhinnapadmajāṇḍakośasantatiṃ Dṛṣṭipātanaṣṭapāpajālamugraśāsanam |
Aṣṭasiddhidāyakaṃ Kapālamālikandharaṃ Kāśikāpurādhināthakālabhairavaṃ Bhaje ||

SHLOKA 8

भूतसङ्घनायकं विशालकीर्तिदायकं काशिवासलोकपुण्यपापशोधकं विभुम्।
नीतिमार्गकोविदं पुरातनं जगत्पतिं काशिकापुराधिनाथकालभैरवं भजे॥

Bhūtasaṅghanāyakaṃ Viśālakīrtidāyakaṃ Kāśivāsalokapuṇyapāpaśodhakaṃ Vibhum |
Nītimārgakovidaṃ Purātanaṃ Jagatpatiṃ Kāśikāpurādhināthakālabhairavaṃ Bhaje ||

फलश्रुति और समापन

SHLOKA 9

कालभैरवाष्टकं पठन्ति ये मनोहरं ज्ञानमुक्तिसाधनं विचित्रपुण्यवर्धनम्।
शोकमोहदैन्यलोभकोपतापनाशनं ते प्रयान्ति कालभैरवाङ्घ्रिसन्निधिं ध्रुवम्॥

Kālabhairavāṣṭakaṃ Paṭhanti Ye Manoharaṃ Jñānamuktisādhanaṃ Vicitrapuṇyavardhanam |
Śokamohadainyalobhakopatāpanāśanaṃ Te Prayānti Kālabhairavāṅghrisannidhiṃ Dhruvam ||

COLOPHON

इति श्रीमच्छङ्कराचार्यविरचितं कालभैरवाष्टकं सम्पूर्णम्॥

Iti Śrīmacchaṅkarācāryaviracitaṃ Kālabhairavāṣṭakaṃ Sampūrṇam ||